"छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥"*॥

मन्त्रविशेषे, पुं। तल्लक्षणादिकं यथा, विश्वसारे।
"मनोर्यस्यादिमध्यान्तेष्वानिलं बीजमुच्यते।
संयुक्तं वा वियुक्तं वा पराक्रान्तस्त्रिधा पुनः ॥
चतुर्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः ॥")

छिन्नग्रन्थिनिका, स्त्री, (छिन्ना ग्रन्थिनी। संज्ञायां कन् ततष्टाप् पूर्व्वह्रस्वश्च।) त्रिपर्णिका। इति राजनिर्घण्टः ॥

छिन्नपत्री, स्त्री, (छिन्नं पत्रं यस्याः। स्त्रियां ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः ॥ (विवरणमस्या अम्बष्ठाशब्दे ज्ञेयम् ॥)

छिन्नमस्ता, स्त्री, (छिन्नं मस्तं शिरो यस्याः।) दशमहाविद्यान्तर्गतषष्ठमहाविद्या। सा च प्रचण्डचण्डिका। यथा,—
"प्रचण्डचण्डिकां वक्ष्ये सर्व्वकामफलप्रदाम्।
यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः ॥
अपुत्त्रो लभते पुत्त्रं अधनो धनवान् भवेत्।
कवित्वञ्च सुपाण्डित्यं लभते नात्र संशयः ॥"
अथ प्रचण्डचण्डिकामन्त्राः। विश्वसारे जामले च।
"लक्ष्मीं लज्जां ततो मायां मात्रां द्वादशिकामपि।
वज्रवैरोचनीये द्वे मायं फट्स्वाहया युतः ॥
लक्ष्मीबीजं यदाद्यं स्यात् तदा श्रीः सर्व्वतोमुखी।
लज्जाबीजेन चाद्येन वश्यतां यान्ति योषितः ॥
मायाबीजेन चाद्येन महापातकनाशनम्।
मात्रां द्वादशिकां बीजमाद्यं स्यान्मुक्तिदायकम् ॥
भैरवोऽस्य ऋषिर्द्देवि! सम्राट् छन्द उदीरितम्।
छिन्नमस्ता स्मृता देवी बीजं कूर्च्चद्वयं पुनः ॥
स्वाहा शक्तिरभीष्टार्थे विनियोग उदाहृतः ॥"
"अत्र लज्जापदं कामबीजपरम्। तथा च।
अत्र लज्जापदे देवि! कामबीजं वितन्यते।
महाकालमतं ज्ञेयं मन्त्रोद्धारं शुभावहम् ॥"
पूर्व्वमायापदे इति पाठे मायायाः पूर्व्वं लज्जाबीजं तस्मिन्नित्यर्थः। तथा च। पूर्व्वमायापदेन लज्जाबीजमुच्यते। अन्यथा तापिन्यादिविरोधः। तथा च।
"कामाद्यां वाग्भवाद्यां वा मायाद्यां वा जपेत् सुधीः।
लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्व्वर्गफलप्रदाम् ॥
अन्येषाञ्च मुनीनां मते सर्व्वत्र मायापदं कूर्च्चपरम्। तत्रैव।
वान्तं वह्निसमायुक्तं रतिबिन्दुसमन्वितम्।
लक्ष्मीबीजमिदं प्रोक्तं सर्व्वकामार्थसिद्धये ॥
वामाक्षिवह्निसंयुक्तं बिन्दुनादविभूषितम्।
शिवबीजं महेशानि! लज्जाबीजमुदाहृतम् ॥
ईशानमुद्धृत्य पुरारिबीजं
सबिन्दुकं नादविभूषितञ्च।
सवामकर्णं परितः प्रकल्प्य
मायां वदन्तीह मनीषिमुख्याः ॥
द्वादशस्वरवर्णं स्यात् नादबिन्दुविभूषितम्।
वाग्भवं बीजमित्युक्तं सर्व्ववाक्यविशुद्धये ॥
इति मन्त्रे चतुर्ण्णां व्याख्यानात् अयमुसमीचीनः। भैरवमते तु माया भुवनेश्वर्य्येव ॥
लक्ष्मीः प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः।
तृतीयेऽस्मिन् सदा देवी महापातकनाशिनी ॥
चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका।
वकारे वरुणः साक्षात् जकारे तु सुराधिपः ॥
रेफे हुताशनो देवो वकारे वसुधाधिपः।
ऐकारे त्रिपुरा देवी रेफे त्रिपुरसुन्दरी ॥
त्रैलोक्यविजया देवी सदैवौकारसंस्थिता।
चकारे चन्द्रमा देवो नकारे हि विनायकः ॥
ईकारे कमला साक्षात् यकारे च सरस्वती।
मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता ॥
वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः।
हाकारे च रतिस्तिष्ठेदेवं मन्त्रसमुच्चयः ॥"
इति व्याख्यानाच्च ॥ * ॥

अस्याः पूजाप्रयोगः।
प्रातःकृत्यादिकं कृत्वा मन्त्राचमनं कुर्य्यात्। यथा,—
"लक्ष्मीमायाकूर्च्चबीजैस्त्रिभिः पीत्वाम्बु साधकः।
वाग्भवेनौष्ठौ संमृज्य मायाभ्यान्तु द्विरुन्मृजेत् ॥
कूर्च्चेन चालयेत् पाणी शम्भन्त्रेण विन्यसेत्।
श्रीमायाकूर्च्चवाक्कामत्रिपुटाभगवर्णकैः ॥
कामकलाङ्कुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान्।
नाभिहृन्मस्तकं चांसौ स्पृष्ट्वा शम्भुर्भवेत् क्षणात् ॥
आचम्यैवं छिन्नमस्तां वत्सरान्तां प्रपश्यति ॥
ततः प्राणायामान्तं विधाय षोढान्यासं कुर्य्यात्।
मन्त्रषोढां ततः कुर्य्यात् त्रैलोक्यवशकारिणीम्।
श्रीबालात्रिपुटायोनिप्रासादप्रणवैस्तथा ॥
कालीवध्वङ्कुशैः कामकलाकूर्च्चास्त्रकैः क्रमात्।
षोडशीमनुवर्णैश्च पृथगष्टादशाक्षरी ॥
एभिर्बीजैर्म्मातृकार्णान् स्वेषु स्थानेषु विन्यसेत्।
एषा ब्रह्मस्वरूपा हि बीजषोढा प्रकीर्त्तिता ॥
अस्याः संन्यसनात् सर्व्वे वज्रदेहा भवन्ति हि।
सर्व्वैश्वर्य्ययुतास्ते हि जीवन्मुक्ता दशाब्दतः ॥"*॥
तत ऋष्यादिन्यासः।
अस्य मन्त्रस्य भैरव ऋषिः सम्राट् छन्दः छिन्नमस्ता देवता हुँकारद्वयं बीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः। यथा, शिरसि भैरवऋषये नमः। मुखे सम्राट्छन्दसे नमः। हृदि छिन्नमस्तायै देवतायै नमः। गुह्ये हूँ हूँ बीजाय नमः। पादयोः स्वाहाशक्तये नमः ॥ ततः कराङ्गन्यासौ। ओम् आं खड्गाय हृदयाय स्वाहा। इति कनीयसि। ओम् ईं सुखड्गाय शिरसे स्वाहा। इति पवित्राङ्गुलयोः। ओम् ऊं सुवज्राय शिखायै स्वाहा। इति मध्यमयोः। ओम् ऐं पाशाय कवचाय स्वाहा। इति तर्ज्जन्योः। ओम् औं अङ्कुशाय नेत्रत्रयाय स्वाहा। इत्यङ्गुष्ठयोः। ओम् अः सुरक्षरक्षासुररक्षायास्त्राय फट्। इति करतलपृष्ठयोः। एवं हृदयादिषु। तदुक्तं भैरवतन्त्रे।
"उच्चरेत् पूर्व्वमाकारं बिन्दुलाञ्छितमस्तकम्।
खड्गाय हृदयायेति स्वाहायुक्तं कनीयसि ॥
ईंकारञ्च ततो देवि! चन्द्रकोटिसमप्रभम्।
सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम् ॥
स्वाहायुक्तं ततो वाच्यं पवित्राङ्गुलिसंयुतम्।
ऊकारञ्च ततो वाच्यं बिन्दुलाञ्छितमस्तकम् ॥
सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्।
स्वाहान्तं मध्यमायाञ्च विन्यसेत्तदनन्तरम् ॥
मात्रां द्वादशिकां देवीं विन्यसेच्च ततः परम्।
पाशायेति समुच्चार्य्य प्रवदेत् कवचाय च ॥
स्वाहान्तं विन्यसेन्मन्त्रं तर्ज्जन्यां तदनन्तरम्।
औङ्कारञ्च ततो देवि! चाङ्कुशं तदनन्तरम् ॥
नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे करयोर्द्वयोः।
अकारञ्च विसर्गान्तं सुरक्षारक्षसंयुतम् ॥
असुररक्षायसंयुक्तं अस्त्रायेति ततः परम्।
फड्वरसमायुक्तं विन्यसेत् करयोर्द्वयोः ॥
हृदि मूर्द्ध्नि शिखायाञ्च कवचे नेत्रमण्डले।
यावदस्त्रं चतुर्द्दिक्षु विदिक्षु च यथाक्रमम् ॥"
त्रिशक्तितन्त्रे भैरववाक्यम्।
"उच्चरेत् प्रणवं पूर्व्वमाकारं बिन्दुसंयुतम्।"
इत्यादिवाक्यात् कराङ्गेषु प्रणवसम्बलितो न्यासः। ततो मूलेन मस्तकादिपादपर्य्यन्तं पादादिमस्तकपर्य्यन्तं वारत्रयं न्यसेत् ॥ * ॥
ततो ध्यानम्।
"स्वनाभौ नीरजं ध्यायेदर्द्धं विकसितं सितम्।
तत्पद्मकोषमध्ये तु मण्डलं चण्डरोचिषः ॥
जवाकुसुमसङ्काशं रक्तबन्धूकसन्निभम्।
रजःसत्त्वतमोरेखायोनिमण्डलमण्डितम् ॥
मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम्।
छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम् ॥
प्रसारितमुखीं देवीं लेलिहानाग्रजिह्विकाम्।
पिबन्तीं रौधिरीं धारां निजकण्ठविनिर्गताम् ॥
विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम्।
दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम् ॥
दिगम्बरीं महाघोरां प्रत्यालीढपदे स्थिताम्।
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ॥
रतिकामोपरिष्ठाञ्च सदा ध्यायन्ति मन्त्रिणः।
सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ॥
विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ।
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः ॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
वर्णिनीं लोहितां सौम्यां मुक्तकेशीं दिगम्बरीम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः।
नागयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव ॥
प्रत्यालीढपदां दिव्यां नानालङ्कारभूषिताम्।
सदा द्वादशवर्षीयामस्थिमालाविभूषिताम् ॥
डाकिनीं वामपार्श्वे तु कल्पसूर्य्यानलोपमाम्।
विद्युज्जटां त्रिनयनां दन्तपङ्क्तिबलाकिनीम् ॥
दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्।
महादेवीं महाघोरां मुक्तकेशीं दिगम्बरीम् ॥
लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः ॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
करस्थितकपालेन भीषणेनातिभीषणाम् ॥